# DEPARTMENT OF SANSKRIT
# UNIVERSITY OF MUMBAI

M.A. Entrance Examination 2016-2017

Paper 1: Unseen Translation

Date : 15th July 2016

Day : Friday

Duration : 3 hours

Marks : 100

Q.1. Translate into English / Marathi (15marks each)

1) तद्दिने एलिसरस्य मनसि महान् आनन्दः कृतकृत्यता च। यतः तदा एव तेन कश्चन विशिष्टःलेखः समापितः आसीत्। तन्निमित्तं तेन सुदीर्घम् अध्ययनं कृतम् आसीत्। बहूनि प्रमाणानि च संगृहितानि आसन्। यहूद्यानाम् इतिहासः, श्रेष्ठपरम्परा, इस्रेलदेशस्य स्वतन्त्रताप्राप्तेः आवश्यकता, हीब्रूभाषायाः पुनरुज्जीवनम् -इत्यादयः अंशाः तेन तत्र सम्यक् प्रतिपादिताः आसन्। यदि एषः लेखः पत्रिकायां प्रकाशितः भविष्यति, यहुद्याः एतं पठिष्यन्ति तर्हि महान् परिणामः भविष्यति इति तस्य दृढः विश्वासः आसीत्। 'हामाग्गिद्' नामिकायै पत्रिकायै स्वलेखं प्रेषयित्वा ततः क्षणगणनाम् आरब्धवान् सः।

2) तुंगभद्राजलबन्धस्य सर्वकारीयम् अतिथीगृहं तत्। अट्टे स्थितस्य प्रकोष्ठस्य वातायनात् बहिः पश्यन्त्याः रजियायाः मूर्धजाः शीतमारुतेन उत्क्षिप्ताः भवन्ति स्म। आ प्रभातात् दुःस्थे हम्पिपरिसरे अटनेन समुत्पन्ना श्रान्तिः शीतवातेन प्रशमं नीयते स्म। 'किं चायम् आनेतुम् आदिशानि?' अमीरेण उक्तं वचनं तस्याः श्रुतिपथं नागतम्। विस्तृतात् जलाशयात् उपरि अनिर्बन्धं वहन् वायुः तत्र कारणम्, उत तस्याः अन्यमनस्कता इत्येतत् तेन नावगतम्। कथमपि अन्यमनस्का एव महिला सा। तिष्ठति एकत्र, मनस्तु विहरति दूरे कुत्रापि इति तेन ज्ञातमेव आसीत्। तथापि स्वयं यदा भाषणोत्साही भवति तदा तां तथैव परित्यज्य मौनेन स्थातुं सः कष्टम् अनुभवति स्म।

3) काञ्चुकीयः - जयतु महाराजः। एष खलु पाण्डवस्कन्धावाराद् दौत्येनागतः पुरुषोत्तमो नारायणः।

दुर्योधनः - मा तावद्। भो बादरायण। किं किं कंसभृत्यो दामोदरस्तव पुरुषोत्तमः? स गोपालकस्तव पुरुषोत्तमः?

काञ्चुकीयः - प्रसीदतु महाराजः। सम्भ्रमेण समुदाचारो विस्मृतः। (पादयोः पतति।)

Scanned with CamScanner

दुर्योधनः - सम्भ्रम इति? आ मनुष्याणामस्त्येव सम्भ्रमः। उत्तिष्ठोत्तिष्ठ।

काञ्चुकीयः - अनुगृहीतोऽस्मि।

दुर्योधनः - इदानीं प्रसन्नोऽस्मि। क एषः दूतः प्राप्तः?

काञ्चुकीयः - दूतः प्राप्तः केशवः।

दुर्योधनः - केशव इति। एवमेष्टव्यम्। अयमेव समुदाचारः।

4) ये प्रधानतः तात्कालिकपरिस्थित्यनुसारम् उपदिष्टाः आचाराः ते कालानुसारं परिवर्तनम् अपेक्षन्ते। यद् यद् नाम समाजधारणार्थम् आवश्यकं तद् तद् धर्मरूपेण स्वीकर्तुं न कोऽपि प्रत्यवायः विद्यते। परिस्थितिः तु नित्यपरिवर्तनशीला। अतः यस्मिन् समये यन्नाम मानवकल्याणकरं प्रतीयते तदेव धर्मस्वरूपं प्राप्नोति। दक्षिणापथे कटिवस्त्रं विहाय सर्वाणि वस्त्राणि उत्तार्य भगवतः पूजा अनुष्ठीयते। उत्तरापथे हिमालये तु सर्वाणि वस्त्राणि परिधाय एव पूजा समाचर्यते। एवं धर्मस्य रूपमपि ' प्रत्येकस्मै' तथा 'प्रत्येकस्मिन्' स्थाने समानं नैव तिष्ठति। सामान्यतः यः धर्मः इति गण्यते स एव पात्र-कर्म-देश-कालादीनां विचारे कृते अधर्मः भवितुम् अर्हति।

Q.2. Translate into English / Marathi (10 marks)

1) जाड्यं धियो हरति सिञ्चति वाचि सत्यं
मानोन्नतिं दिशति पापमपाकरोति।
चेतः प्रसादयति दिक्षु तनोति कीर्तिं
सत्संगतिः कथय किं न करोति पुंसाम्॥
पापान्निवारयति योजयते हिताय
गुह्यं निगूहति गुणान् प्रकटीकरोति।
आपद्गतं च न जहाति ददाति काले
सत्संगतिः कथय किं न करोति पुंसाम्॥

Scanned with CamScanner

(10 marks)

2) उदीर्यमाणमस्त्रं तद्विश्वामित्रस्य धीमतः
दृष्ट्वा विप्रद्रुता भीता मुनयः शतशो दिशः।
वसिष्ठस्य च ये शिष्या ये च वै मृगपक्षिणः
विद्रवन्ति भयाद्भीता नानादिग्भ्यः सहस्रशः।
वसिष्ठस्याश्रमपदं शून्यमासीन्महात्मनः
मुहूर्तमिव निःशब्दमासीदीरिणसंनिभम्।
वदतो वैं वसिष्ठस्य मा भैरिति मुहुर्मुहुः
नाशयाम्यद्य गाधेयं नीहारमिव भास्करः।

(20 marks)

3) ततः पूर्णे कालेऽश्वपतिदयिताऽसूत तनयां
सुवर्णां तन्वङ्गीं नयनयुगुलेनाऽर्भकमृगीम्।
कृतं सावित्रीति स्मरणरमणं नाम वरदं
क्रमेणैषा जाता तरुणवयसा शोभिततनुः॥
तां भ्राजमानां सुपवित्रमूर्तिं
धर्मे स्थितां वीक्ष्य नृपालपुत्राः।
तेजोभिभूतास्तरुणीं स्वभार्यां
मन्तुं विचारं तरसाऽत्यजंस्ते॥
तदा पिता तामतुलस्वरूपां
जगाद पुत्रि स्वयमेव वृत्वा।
योग्यं वरं यं त्वमिहानयेस्तं
स्वीकर्तुमीहे तव धर्मचारम्॥
पितुर्निदेशं शिरसि प्रधार्य
प्रणम्य नीत्वा सचिवं च वृद्धम्।
पुरे पुरे ग्रामशते नगर्यां
सा संचचारोचितभर्तृलब्ध्यै॥

Scanned with CamScanner

साल्वाख्यराज्यस्य च राजधान्या

वनोपकण्ठे मुनिवृन्दवासे।

आगत्य तौ स्वागतसंप्रसन्नौ

पप्रच्छतुः सर्वशिवं मुनीशान्॥

---

Scanned with CamScanner

# DEPARTMENT OF SANSKRIT

# UNIVERSITY OF MUMBAI

## M.A. Entrance Examination 2016-2017

## Paper 2: History of Classical Sanskrit Literature

Date : 15th July 2016

Day : Friday

Duration : 3 Hours

Marks : 100

Q.1) Write exhaustive notes (Any two) (40)

a) Dramas of भवभूति

b) Historical poetry in Sanskrit

c) मेघदूतम् of कालिदास

Q.2. Write critical notes (Any four) (60)

1) पंचतंत्रम्

2) भासनाटकचक्रम्

3) अर्थगौरवof भारवि

4) कुमारसंभवम्

5) वेणीसंहारम् of भट्टनारायण

6) नैषधीयचरितम् of श्रीहर्ष

---

Scanned with CamScanner